# 27 - सप्तविंश दशकम्

## क्षीराब्धि मथनं , कूर्मावतारम् च

दुर्वासास् सुर वनिताप्त दिव्य माल्यं
शक्राय स्वय मुपदाय तत्र भूयः ।
नागेन्द्र प्रतिमृदिते शशाप शक्रं
का क्षान्तिस् त्वदितर देवतांश जानाम् ॥ ॥27-1॥

शापेन प्रथित जरेऽथ निर्जरेन्द्रे
देवेष्व प्यसुर जितेषु निष्प्रभेषु ।
शर्वाद्याः कमलज मेत्य सर्व देवाः
निर्वाण प्रभव समं भवन्त मापुः ॥ ॥27-2॥

ब्रह्माद्यैस् स्तुत महिमा चिरं तदानीं
प्रादुष्यन् वरद पुरः परेण धाम्ना ।
हे देवा दितिज कुलैर् विधाय सन्धिं
पीयूषं परिमथ तेति पर्यशास् त्वं ॥ ॥27-3॥

सन्धानं कृतवति दानवैस् सुरौघे
मन्थानं नयति मदेन मन्द राद्रिम् ।
भ्रष्टेऽस्मिन् बदर मिवोद्वहन् खगेन्द्रे
सद्यस् त्वं विनिहितवान् पयः पयोधौ ॥ ॥27-4॥

आधाय द्रुत मथ वासुकिं वरत्रां
पाथोधौ विनिहित सर्वबीज जाले ।
प्रारब्धे मथन विधौ सुरासुरैस् तैः
व्याजात् त्वं भुजग मुखेऽकरोस् सुरारीन् ॥ ॥27-5॥

क्षुब्धाद्रौ क्षुभित जलोदरे तदानीं
दुग्धाब्धौ गुरुतर भारतो निमग्ने ।
देवेषु व्यथित तमेषु तत् प्रियैषी
प्राणैषी: कमठ तनुं कठोर पृष्ठाम् ॥ ॥27-6॥

वज्राति स्थिर तर कर्परेण विष्णो
विस्तारात् परिगत लक्ष योजनेन ।
अम्भोधे: कुहर गतेन वर्ष्मणा त्वं
निर्मग्नं क्षिति धरनाथ मुन्निनेथ ॥ ॥27-7॥

उन्मग्ने झटिति तदा धराधरेन्द्रे
निर्मेथुर् द्दढ मिह सम्मदेन सर्वे ।
आविश्य द्वितय गणेऽपि सर्पराजे
वैवश्यं परिशमयन् अवीवृधस् तान् ॥ ॥27-8॥

उद्दाम भ्रमण जवोन् नमत् गिरीन्द्र
न्यस्तैक स्थिरतर हस्त पङ्कजं त्वाम् ।
अभ्रान्ते विधि गिरि शादय: प्रमोदात्
उद्भ्रान्ता नुनुवु रुपात्त पुष्प वर्षा: ॥ ॥27-9॥

दैत्यौघे भुजग मुखा निलेन तप्ते
तेनैव त्रिदश कुलेऽपि किञ्चिदार्ते ।
कारुण्यात् तव किल देव वारिवाहा:
प्रावर्षन् अमर गणान् न दैत्य सङ्घान् ॥ ॥27-10॥

उद्भ्राम्यत् बहु तिमि नक्र चक्रवाले
तत्राब्धौ चिर मथितेऽपि निर्विकारे ।
एकस् त्वं कर युग कृष्ट सर्पराजः
संराजन् पवन पुरेश पाहि रोगात् ॥ ॥27-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥